विचिरित्य, विचिराय्य, विचिचिरयिष्य ;
चिरायम् २, } चिरायम् २, } चिचिरयिषम् २ ; }
चिरयित्वा २, } चिराययित्वा २, } चिचिरयिषित्वा २. }

(527) "चिल वसने" (VI-तुदादिः-1355. सक. सेट् पर.)

चेलकः-लिका, चेलकः-लिका, चिचेलिषकः-चिचिलिषकः-षिका ;
चेचिलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककिलतिवत् (193) ज्ञेयानि । [1]चेलः—वस्त्रम् । गर्हिता ब्राह्मणी=[2]ब्राह्मणिचेली । [A]चिलितः ।

(528) "चिल्ल शथिल्ये भावकरणे च"

(I-भ्वादिः-533. सक. सेट्. पर.) भावकरणम्=अभिप्रायाविष्कारः ।

चिल्लकः-ल्लिका, चिल्लकः-ल्लिका, चिचिल्लिषकः-षिका, चेचिल्लकः-ल्लिका;
चिल्लिता-त्री, चिल्लयिता-त्री, चिचिल्लिषिता-त्री, चेचिल्लिता-त्री;
चिल्लन्-न्ती, चिल्लयन्-न्ती, चिचिल्लिषन्-न्ती ; —
चिल्लिष्यन्-न्ती-ती, चिल्लयिष्यन्-न्ती-ती, चिचिल्लिषिष्यन्-न्ती-ती; —
— चिल्ल्यमानः, चिल्लयिष्यमाणः, चेचिल्ल्यमानः, चेचिल्लिष्यमाणः;
[3]चिल्-चिल्लौ-चिल्लः ; — —
चिल्लितम्-तः, चिल्लितः, चिचिल्लिषितः, चेचिल्लितः-तवान् ;
[B]चिल्लः, चिल्लः, चिचिल्लिषुः, चेचिल्लः;
चिल्लितव्यम् , चिल्लयितव्यम् , चिचिल्लिषितव्यम् , चेचिल्लितव्यम् ;
चिल्लनीयम् , चिल्लनीयम् , चिचिल्लिषणीयम् , चेचिल्लनीयम् ;

---

1. पचादिषु (3-1-134) 'चेलट्' इति पाठेन, इगुपधलक्षणं कं बाधित्वा, अच् । टित्त्वात् स्त्रियां ङीप् ।
2. 'घरूपकल्पचेलड्ब्रुव—' (6-3-43) इति पूर्वपदस्य ह्रस्वः । चेलडादयः वृत्तिविषये निन्दाद्योतकाः ।
3. 'संयोगान्तस्य—' (8-2-23) इति लकारस्य लोपः ।

A. 'चिलितपीतपटेन चलन् इलन् अविलितोऽक्कुरां परितो दृशम् ॥' धा. का. 2-78.

B. 'मूलं फलं वाऽप्यदतामचुल्लतां प्रफुल्लभक्त्युन्नतिचिल्लचेतसाम् ॥' धा. का. 1. 68. चिल्लचेतसाम् = आर्द्रीभवन्मनसाम्—इत्यर्थः ।